# Vishnukrita Shiva Stuti 1

# વિષ્ણુકૃતા શિવસ્તુતિઃ ૧

## Document Information

Text title : Vishnukrita Shiva Stuti 1

File name : viShNukRRitAshivastutiH1.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 22| 123.2-143.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

Vishnukrita Shiva Stuti 1

# વિષ્ણુકૃતા શિવસ્તુતિઃ ૧

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

વિષ્ણુરુવાચ ।

શિવ એવ મહાદેવો દેવદેવોત્તમઃ પ્રભુઃ ॥ ૧૨૩.૨॥

શિવ એવ મમારાધ્યઃ શિવ એવ ધનં મમ ।
શિવ એવ મમ સ્વામી શિવ એવં પ્રભુર્મમ ॥ ૧૨૪॥

શિવ એવ હિ નિક્ષેપઃ શિવ એવ હિ જીવનમ્ ।
શિવ એવ હિ કલ્યાણં શિવ એવ હિ ભૂષણમ્ ॥ ૧૨૫॥

શિવ એવ મમાશાસ્યઃ શિવ એવ પરા ગતિઃ ।
શિવ એવ મમાભ્યર્ચ્યઃ શિવ એવ મમેષ્ટદઃ ॥ ૧૨૬॥

શૃણોમ્યહં શિવકથાં શિવમેવાર્ચયામ્યહમ્ ।
પશ્યામિ ચ જગત્સર્વં શિવરૂપં ચરાચરમ્ ॥ ૧૨૭॥

સર્વપાપહરં પુણ્યં શિવનામ જપામ્યહમ્ ।
યમાહુઃ પાર્વતીનાથં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૨૮॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુઃ શ્રીવિરૂપાક્ષં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૨૯॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુર્જગતામીશં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૩૦॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુઃ પરમેશાનં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૩૧॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુઃ શમ્ભુમનઘં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૩૨॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।

યમાહુસ્તારકં બ્રહ્મ વેદાસ્તમહમીશ્વરમ્ ॥ ૧૩૩॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુસ્સર્વકર્તારં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૩૪॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુર્નિષ્પ્રતિદ્વન્દ્વં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૩૫॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુર્યજ્ઞફલદં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૩૬॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુર્જ્ઞાનદાતારં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૩૭॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુઃ શિવમદ્વૈતં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૩૮॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુર્નિર્ગુણં શાન્તં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૩૯॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુર્નિષ્ક્રિયં શુદ્ધં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૪૦॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુર્નિષ્કલં નિત્યં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૪૧॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા ।
યમાહુર્મૃત્યુહન્તારં વેદાસ્તમહમીશ્વરમ્ ॥ ૧૪૨॥

પૂજયામ્યતિયત્નેન પ્રણમામિ ચ સર્વદા । ૧૪૩.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુકૃતા શિવસ્તુતિઃ ૧ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૨। ૧૨૩.૨-૧૪૩।૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 22 . 123.2-143.1..

Proofread by Ruma Dewan

*Vishnukrita Shiva Stuti 1*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*